ॐ

श्रीत्रिगुणेश्वर–शिवस्तोत्रम्

प्रणेता—श्री १०८ आचार्याऽमृतवाग्भवपादाः

★ ★ ★

प्रकाशक—विद्वद्वरकल श्री राधाकृष्ण धार्मिक संस्था, A/1 हाई कोर्ट, शेरशाह रोड़, नई दिल्ली

आदर्शचिक्करण–कपोलतलं सुनासं
चञ्चत्बृहच्छवयुगं स्वलिनीलकण्ठम् ॥
भोगोपमप्रथितसुन्दरदीर्घबाहुं
पद्मासने समुपविष्टमहं स्वतुष्ठम् ॥१॥

शान्तं त्रिनेत्रमलिकेब्जकलां वहन्तं
नागेन्द्रचर्मवसनं भुजगोपवीतम् ॥
अन्तबहिश्च रमणीयतमस्वरूपं
विद्याऽमृताऽभयवराऽऽश्रयदानदक्षम् ॥२॥

गौरीं गणेशसहितां दधतं निजाङ्के
गौरं प्रसन्नमुखमम्बुजलचनाढ्यम् ॥
गङ्गां स्वमूर्धनि जटापटले दधानं
ध्यायामि तं हृदि शिवं त्रिगुणेश्वर स्वम् ॥३॥

ब्रह्मा हरिर्हर इति त्रिगुणमीतीत्य
यस्तन्मयो वरकलो जयति त्रिलोक्याम् ॥
विश्वप्रपञ्चरचनाचतुराय मह्यं
तस्मै नमो भगवते त्रिगुणेश्वराय ॥४॥

यं वैद्यनाथ इति वद्यजना वदन्ति
मृत्युञ्जय यमिह मर्त्यजनाः स्तुवन्ति ॥
शं कांक्षिणः स्वमिह शङ्करमामनन्ति
तस्मै नमो भगवते त्रिगुणेश्वराय ॥५॥

वाचो बृहस्पतिमम निगदन्ति तिस्रो
वेदत्रयी सततमेनमिह स्तवीति ॥
अग्नित्रयी ज्वलति यं श्रितवत्यजस्रं
तस्मै नमो भगवते त्रिगुणेश्वराय ॥६॥

धामयत्री परनधामनि साऽपि यस्मिन्
विश्रान्तिमेति परनिर्वृतिभावरम्ये ॥
स्वेभ्यो ददाति कृपया तदपि प्रसन्न–
स्तस्मै नमो भगवते त्रिगुणेश्वराय ॥७॥

शक्तित्रयी घनतयाऽश्रयते यतोऽमुं
तुर्योऽपि पञ्चतनुते सततं कृतीः स्वाः ॥
पञ्चाननः सुरनराऽसुरसङ्घपूज्य–
स्तस्मै नमो भगवते त्रिगुणेश्वराय ॥८॥

वैभूत्यवांस्त्रिदिवसेवितपादपोऽद्य
नाकार्थिनां विजयते सुखदः परोऽर्थं ॥
वह्नीन्दुसूर्यनयनः परमार्थसार–
कल्पःश्रियेऽस्तु स सतां त्रिगुणेशलीलः ॥९॥

स्वनिर्मितेन स्तोत्रेण प्रीणयँस्त्रिगुणेश्वरम् ॥
शमिच्छति समस्तानामार्चामृतवाग्भवः ॥१०॥